International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 97-99
© 2023 IJSR
www.anantaajournal.com
Received: 04-04-2023
Accepted: 09-05-2023

**K Jagan Mohan**
Research Scholar, Department of Sanskrit & IC, SCSVMV Deemed University, Enathur, Kanchipuram, Tamil Nadu, India

**Corresponding Author:**
**K Jagan Mohan**
Research Scholar, Department of Sanskrit & IC, SCSVMV Deemed University, Enathur, Kanchipuram, Tamil Nadu, India

# तर्कसारसंग्रहे सिद्धान्तपदार्थनिरूपणम्

**K Jagan Mohan**

प्रस्तावना

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।।**

इति हि मानवीयं वचनं तर्कस्य परमामोदकत्वम् अभ्युपगच्छति। ऊहापरपर्यायः तर्कः तत्त्वज्ञानार्थं इति सर्वप्रमाणानुग्राहकश्चेति सूत्र-भाष्यकृतां वचोभिः निश्चितम्। किञ्च तर्कापर पर्यायान् सर्वानपि पदार्थान् निःश्रेयसकारणभूतान् प्रतिपादयितुं शास्त्रमिदम् अन्वर्थनामः इति उच्यते, प्रशंस्यते च निखिलशास्त्रविद्वद्भिः। अस्मिन् शास्त्ररत्नाकरे विराजन्ते नैयायिकशिरोमणयः अक्षपाद-पक्षिलोद्योतकर-वाचस्पति-जयन्त-शशधर-उदयनादयः बहवः प्राचीनाः पण्डितप्रकाण्डाः सन्ति। उदयनाचार्याणाम् आनन्तरिक नैयायिकेषु वरदराजः अग्रगण्यः। अयं न्यायशास्त्रे एवं मीमांसायामपि अधिकृतः इति स्वयं निरुपयति – न्यायविद्याविदग्धस्य मीमांसापारदृश्वनः। इयं वरदराजस्य कृतिर्विजयतेतराम्।। (ता.र. पु382) श्रीरामदेवमिश्रसूनुरयं मैथिलः इति, तस्य कालः एकादशशतकमिति आधुनिकानामभिप्रायः। उदयनाचार्यैः लक्षणावलीग्रन्थः 104 तमे वर्षे प्रणीतेति ज्ञायते।

इदम् उत्तरपद्ये पूर्वार्थस्य दृष्टान्तशेषत्वमुत्तरस्य सिद्धान्तपरतेत्याशङ्क्यावतारयति – सिद्धानतेति। ननु प्रमाणैरभ्युपेत इत्येतावतैव सिद्धान्तव्यावृत्तिसिद्धेः। प्रमाणानामाभिमानिकसिद्धत्वमनुप-योगीत्याशङ्क्याहानित्यः शब्द इत्यादीना।

कुतोऽन्यतरस्य सिद्धान्तताहानिरित्यत आह – वस्तुत इति। अत्र एकाक्षवैकल्यन्यायेनान्यतरस्य प्रमाणमूलत्वेप्युभयोः प्रमाणमूलत्वासंभवोक्तिः।

ननु यस्यान्यतरस्य वस्तुतः प्रमाणमूलत्वं न संभवति मा भूत्तस्य सिद्धान्ततापीत्यत आह – तत्तद्वादिनामिति। उक्ते अर्थे सूत्रं प्रमाणयति तन्त्राधिकरणेति। इदमित्थं भूतं चेत्यभ्यनुज्ञायमानमर्थजातं सिद्धं तस्यान्त इत्थं भावव्यवस्था संस्थितिः तन्त्रार्थसंस्थितिः। तन्त्रमितरेतराभ्यसंबन्धस्यार्थ-समूहस्योपदेशः 209 शास्त्रम्। अधिकरणानुषक्तार्थसंस्थितिरधिकरणसंस्थितिः अभ्युपगमं स्थितिरवधारणार्थपरिग्रहः। परीक्षायामभ्युपगमसिद्धान्त इति सूत्रार्थः। सोऽपि चतुर्विध इत्यत्र तच्छब्दः सन्निहितं प्रकृतं सिद्धान्तमेव परमृशतीत्याह – स चेति।

सिद्धान्तभेदेऽपि सूत्रं प्रमाणयति – तत्रेति। तत्र द्वन्द्वान्ते श्रूयमाणः संस्थितिशब्दः प्रत्येकं संबध्यते। संस्थित्यार्थान्तरशब्दयोः समानाधिकरणः समासः अन्तरं भेदः तेन सर्वतन्त्रसंस्थिति प्रतितन्त्र संस्थित्यधिकरणसंस्थित्यभ्युपगम संस्थितिलक्षणार्थभेदाच्चतुर्विधः सिद्धान्त इति वाक्यार्थः।

उत्तरकारिकायां यथामानेन मेयधीरित्यस्य पूर्वोत्तरानन्वयाद्वैयर्थ्यमाशङ्क्याह – तत्रेति। सर्वशब्दस्यापेक्षा संकोचमभिव्यक्तुं स्वतन्त्रेऽधिकतत्वाभिधानं लक्ष्ये लक्षणानुगतिं दर्शयति प्रमाणादीति। प्रतितन्तुलक्षणे नियमाविवक्षायां विवक्षायां वा योगव्यवच्छेदे लक्षणस्यातिव्याप्त्यसंभवौ स्यातामित्यन्ययोगं व्यवच्छिनत्ति – परतन्त्रेरिति।

अनुमेयसिध्यनुषक्तसिध्योर्हेतुहेतुमद्भावभ्रमं वारयति – अनुमेयानुषक्तेति। 210 अस्मदादीनां मत्याद्युपादानादिष्वपरोक्षविज्ञप्तिरेव नास्ति येषामस्ति योगिनां तेषामपि कादाचित्की विज्ञप्तिरूपादानादिष्विति सार्वकालिककार्योत्पादानुकूलापरोक्षविज्ञानादिमानीश्वरः सिध्यतीत्यभिप्रेत्याह – उपादानादीति। आदिशब्देन उपकरणसंप्रदान प्रयोजनानि गृह्यन्ते। प्रयत्नादीत्यादिशब्देन कार्यानुकूलदेहादि परिग्रह तद्यापारादिकं गृह्यते।

मतान्तरमाहान्येत्विति। अनुषङ्गेण सिद्धिर्यस्येति व्यधिकरणो बहुव्रीहिः। अस्ति हि चक्षुषा पश्यति मनसा विजानातीत्यादिः क्रियाकारणयोः तत्रासंबद्धाभिधानलक्षणो व्यपदेशः। स किं मूलेर्वृक्षस्तिष्ठतीत्यादिवदवयवेन समुदायस्य किं वा परशुना वृश्चतीत्यादिवदन्येनान्यस्येति विशये अन्येनान्यस्यैवायं व्यपदेशः तेन देहेन्द्रियादिव्यतिरिक्तः सिध्यति। आत्मेत्यनुसन्दधानं सूत्रकार आह – दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति।

महमद्राक्षं चक्षुषा तमहं स्पर्शनेन स्पृशामीति विभिन्नकरणकावेककर्तृकावेकविषयौ प्रत्ययौ प्रतिसन्धीयेते। तद्येतौ प्रतिसन्धाता ससङ्घाता रिक्तः सिध्यत्मात्मेति 211 सूत्रकाराभिसन्धिः। सिद्धं चात्र दर्शनस्पर्शनयोर्भेदः नात्मप्रतिपत्तिरिति न देहादि सङ्घातातिरिक्त आत्मा। कुतः आत्मप्रतिपत्तिहेतूनां दर्शनस्पर्शनाभ्यामेकार्थग्रहणादीनां मनसि सर्व विषये संभवात्। मन एवात्मेत्याक्षेपसूत्रार्थः – ज्ञातुर्ज्ञानेति। अस्तु नाम मनस आत्मत्वं तथापि तस्य मतिस्थानं किंचिदस्ति – न वा। यदि न स्यात्। चक्षुषा पश्यतीत्यादौ प्रमितः प्रत्येतुः प्रतीतिसाधनापेक्षानियमो भज्येत। प्रथमे कर्तृकरणयोस्तक्षवाश्यादौ भेदप्रतीतेर्ज्ञातृमनोऽतिरिक्तमतिसाधनमवश्यमेषितव्यम्।

एवं च सति ज्ञातार्थात्मसंज्ञानमृष्यते त्वया मनसः संज्ञात्वनुज्ञायते। मतिसाधने मनः संज्ञा न मृष्यते मतिसाधनत्वमनुज्ञायत इति विवादः संज्ञायां न समजनीति समाधानसूत्रार्थः।

अत्रौदयनं संवादमाह – परतन्त्रे इति चतुर्ष्वपि सिद्धान्तेषु क्रमेण सूत्राणीति सर्वतन्त्राविरुद्धः तन्त्रे अधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः समानतन्त्रसिद्धिः परतन्त्रासिद्धिः। प्रतितन्त्रसिद्धान्तः अत्र समानशब्द एकत्ववचनः। यत्सिद्धावन्यप्रकरणसिद्धिः साधिकरणसिद्धान्तः 212 अपरीक्षिताभ्युपगमात्तद्विशेषण-परीक्षणमभ्युपगमसिद्धान्तः इति।

## References


1. वैशिषिकसूत्राणि - कणादमहर्षिः राष्ट्रीयसंस्कृतविश्वविद्यालयः, तिरुपतिः
2. सप्तपदार्थी - ड. तपनशङ्करभट्टाचार्यः संस्कृत वुक डिपो,

3. तर्कसंग्रहः - रामचन्द्रझा चौखाम्बा संस्कृत सीरिज, 1987
4. पदार्थधर्मसंग्रहः - प्रशस्तपादः राष्ट्रीयसंस्कृतविश्वविद्यालयः, तिरुपतिः
5. न्याय एवं वैशेषिक दर्शन् -वेदमूर्ति पं.श्रीराम शर्मा - युगनिर्माण योजना विस्तर ट्रस्ट् 1999